संस्कृत-वार्ता:
13.08.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- स्वतन्त्रतादिवस-समारोहस्य उपलक्ष्ये समग्र-देशे हर घर तिरङ्गा-इत्यस्य अभियानस्य अन्तर्गतं जनसमागमाः आयोज्यन्ते। उपराष्ट्रपतिः जगदीपधनखडः नवदिल्ल्यां त्रिवर्ण-द्विचक्रिकाभियानाय हरितध्वजं प्रदर्शितवान् ।
- केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा भारतं विकसितराष्ट्रं निर्मातुं नवान्वेषणाय, वैज्ञानिकविचाराय, त्वरित-समाधानाय च आह्वानम् अकरोत्।
- प्रशासनं धीवराणां सुरक्षां सुनिश्चितुं व्यवसायं च वर्धयितुं मत्स्यगृहीतासु सागरीय नौकासु एकलक्षं नियन्त्रणोपकरणानि स्थापयिष्यति।
- कलकत्ता-उच्च-न्यायालयेन कोलकातानगरे एकया महिला-चिकित्सिकया सह घटितं दुष्कर्मप्रकरणं केन्द्रीयान्वेषणविभागं प्रति निरीक्षणार्थं प्रेषितम्।
- भारतीय-पैराबैडमिण्टन-क्रीडक: प्रमोदभगत: डोपिंग-विरोधी-नियमानाम् उल्लङ्घन प्रकरणे अष्टादश मासानामवधिपर्यन्तं निलम्बित:।

<u>हर घर तिरङ्गा-अभियानस्य</u>

गुरुवासरे स्वातन्त्र्यदिनस्य उत्सवस्य भागत्वेन हर घर तिरङ्गा-अभियानस्य अन्तर्गतं सम्पूर्णे देशे जनसमागमाः आयोज्यन्ते । अस्मिन् मासे पञ्चदश दिनाङ्कपर्यन्तं सम्पूर्णे देशे नागरिकेषु देशभक्ति-भावं वर्धयितुं एतत् अभियानम् आयोज्यते। एतस्य उपक्रमस्य अन्तर्गतं प्रशासनं जनान् स्वगृहेषु त्रिवर्णध्वजारोहणं कृत्वा त्रिवर्ण ध्वजया सह सेल्फ़ी इति स्वछायाचित्रं स्वीकृत्य हर घर तिरङ्गा इति जालपुटे उपरोपणं कर्तुं प्रार्थयति। उपराष्ट्रपतिः जगदीपधनखडः अद्य प्रातः नवदेहल्याः भारतमण्डपस्थलात् हरघरतिरङ्गा इत्यस्य द्विचक्रिकया ध्वजम् प्रदर्शितवान् । अस्मिन् अवसरे केन्द्रीयमन्त्रिणः गजेन्द्रसिंह-शेखावत: राममोहननायडु: किञ्जारपु: किरेन रिजिजु: मन्सुखमाण्डविया च उपस्थिताः आसन्। मेजर-ध्यान- चन्द- राष्ट्रिय-क्रीडाङ्गणे एष: जन समागम: सम्पन्नः। अस्मिन् अवसरे एनं जनसमूहं सम्बोधयन् उपराष्ट्रपतिः धनखडः अवदत् यत्, हर घर तिरङ्गा-अभियानं राष्ट्रस्य स्वातन्त्र्यं गौरवम् विकसितभारतं प्रति प्रतिबद्धतां च प्रतिबिम्बयति।

## केन्द्रीयवित्तमन्त्री

केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा भारतं विकसितराष्ट्रं निर्मातुं नवान्वेषणस्य, वैज्ञानिकचिन्तायाः, त्वरित-समाधानस्य च आह्वानम् अकरोत्। सा अद्य भोपाल-नगरस्य भारतीय-विज्ञान-शिक्षा-अनुसंधान-संस्थाने आयोजितं एकादशदीक्षान्तसमारोहं सम्बोधयन्ती आसीत्। वित्तमन्त्रिणा प्रोकतं यत्, वैज्ञानिकशिक्षायाः शोधस्य च अधिकम् उपयोगः समाजस्य प्रगतये करणीयः इति । सीतारामन् इत्येषा भोपालनगरे भारतीय-विज्ञान-शिक्षा-अनुसंधान-संस्थानस्य नूतन-शैक्षणिक-भवनस्य, व्याख्यान-भवनस्य च शिलान्यासमपि कृतवती। अनया कथि तं यत् उन्नत-रसायन-विज्ञान स्य माध्यमेन देशस्य उर्जावश्यकता: सम्पूरयितुंमपि आह्वानं कृतवती। कृत्रिममेघारित प्रौद्योगिकीयानुसन्धाने त्यादिभ्य: वर्धमानं आय व्यय आवण्टनं समेत्य प्रशासनस्य विभिन्नानां प्रयासानां उल्लेखं कुर्वती मन्त्रिणा प्रोदीरितं यत् समन्वितप्रयासै: अस्माभि: देशं विकसितराष्ट्रं विनिर्मातुं प्रयास: करणीय:। अत्रावसरे मध्यप्रदेशस्य मुख्यमन्त्री डॉ मोहनयादव अपि कार्यक्रमे भागं भजितवान्।

## सर्वकारी-मत्स्यपालनम्

नवदिल्ल्यां मत्स्यपालनक्षेत्रे अन्तरिक्ष-प्रौद्योगिकीनाम् अनुप्रयोग: इत्यस्मिन् विषये एकां राष्ट्रीय-सङ्गोष्ठीं सम्बोधयन् मत्स्य-पालन-मन्त्री राजीवरञ्जनसिंह: उक्तवान् यत् सर्वकार: धीवराणां सुरक्षां सुनिश्चितुं तेषां च व्यवसाय-वर्धयितुं धीवराणां नौकासु 'ट्रांसपॉण्डर' इति नियन्त्रणोपकरणानि स्थापयिष्यति तथा च यदि कोऽपि धीवर: सीमा-पारं करोति तर्हि ट्रांसपोण्डर इति उपकरणमपि सूचनां निर्गमिष्यति। देशस्य प्राय: कोटित्रयं यावत् जना: मत्स्यव्यापार् संलङ्गना: सन्ति एवञ्च सर्वकार: मत्स्यजीवीनां कल्याणाय प्रतिबद्ध: अस्ति।

## जयशङ्कर:- भारतामेरिकादेशौ

विदेशमन्त्री डॉ एस. जयशङ्कर: न्यगादीत् यत् भारतम् आविश्वे लोकतन्त्रस्य समर्थकदेशो विद्यते। असौ विश्वासम् अभिव्यक्तवान् यत् अमरिकादेशीयेन नवनिर्वाचितेन राष्ट्रपतिना साकं भारतस्य सम्बन्ध: समुचितं निर्मास्यते। डॉ. जयशङ्कर: भारतामेरिकादेशयो: सम्बन्धानां विकासम् अमरिकास्थितान् भारतीय प्रवासिन: च सम्बोधयन् आसीत्। असौ पुन: अवोचत् यत् एच्. वन्.बी इति पारगमना-नुमतिपत्रेण भारत-अमरिकयो: सम्बन्धान् प्रारूपं दातुं शीतयुद्धसादृशमेन योगदानं विहितम्। विश्वं प्रति विदेशमन्त्रिण: कीदृशं दृष्टिकोणं वर्तते तावत् एतादृशे प्रसङ्गे विदेशमन्त्री अब्रवीत् यत सम्पूर्णविश्वं काठिन्यं समयं दृग्गोचरीकरोति। असौ-पश्चिमैशिया-दक्षिणपूर्वैशिया-कोविड-महामारी-इत्यादीनां विषयाणां सततं प्रभावं पुनरावर्तितवान्। उक्तवान् च यत् इदमेकं

समाह्वानयुतं परिदृश्यं विद्यते। काठिन्यपरिस्थितौ अपि उभयो: देशयो: मध्ये सम्बन्ध: समन्वययुतो भविष्यति।

## पश्चिमबङ्गाल-उच्चन्यायालयादेश:

कलकत्ता-उच्च-न्यायालयेन कोलकातानगरस्य एकस्मिन् चिकित्सकीयमहाविद्यालये चिकित्सालये च एकया महिला-चिकित्सिकया सह घटितं दुष्कर्मप्रकरणं केन्द्रीयान्वेषण विभागं प्रति निरीक्षणार्थं प्रेषितम्। न्यायालयेन आरक्षिबलाय आदेश: प्रदत्त: यत् सर्वाणि प्रतिवेदनानि अन्वेषणविभागाय प्रदातव्यानि। पूर्वप्रधानाचार्यस्य विलम्बेन समागतोत्तरम् अभिलक्ष्य उच्चन्यायालयेन प्रश्न: पृष्ट:। उक्तं च यत् राज्यप्रशासनं प्रदर्शनकारिभ्य: चिकित्सकेभ्य: किं कार्यं सम्पादयति। यतो हि प्रदर्शनरतै: चिकित्सकै: समग्रदेशे रोगिण: काठिन्यम् अनुभवन्ति।

## जी4 यूएनएससी-रिफॉर्मस्

संयुक्तराष्ट्रसङ्घे भारतस्य उपस्थायि प्रतिनिधि-राजदूत: आर. रवीन्द्र: गतदिने संयुक्तराष्ट्रसङ्घस्य वादविवादे जी-4 इत्यस्य समूहस्य देशानां पक्षत: प्रदत्ते वक्तव्ये अवदत् यत् संशोधनं विना संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषद् वैश्विक समाह्वानानां निवारणं कर्तुं समर्थ: नास्ति। स: उक्तवान् यत् संयुक्तराष्ट्र: सुरक्षा-परिषदि संशोधनं केवलं अस्या संरचनायां विद्यमानम् अस्थायित्वं वर्धयिष्यति अपि च वर्तमान- वैश्विक समाह्वानानिं दूरीकर्तुं असमर्थो अस्ति।

## हॉकी-दल-दिल्ली

अद्य दिल्ल्यां विमानस्थानके पेरिस-ओलम्पिक-क्रीडायां कांस्यपदक विजेतु: भारतीय-हॉकी-दलस्य हार्दं स्वागतं जातम् तत्रैव पदक विजेतृणां दर्शनार्थं बहव:जना: समागता: आसन्। युव-क्रीडा-मन्त्री मनसुख-मण्डाविया दिल्लयां एकास्मिन् कार्यक्रमे क्रीडकानां सम्मानं कृतवान्। भारतीय-हॉकी-दलस्य प्रथम: समूह: शनिवासरे नवदिल्ल्यां विमान स्थानकं प्राप्तवान्।

## बैडमिण्टन-वर्ल्ड-फेडरेशन्-प्रमोद: भगत:

टोक्यो नगरे जातायां पैरालिम्पिक-शटलर-इत्यस्यां प्रतिस्पर्धायां स्वर्णपदकविजेता प्रमोदभगत: बैडमिण्टन-वर्ल्ड-फेडरेशन् इत्यनेन डोपिंग-विरोधी-नियमानाम् उल्लङ्घनाय अष्टादश्-मासानामवधि-पर्यन्त निलाम्बित:। एतेन कारणेन प्रमोद: पेरिस् चतुर्विंशत्यधिकं-द्विसहस्रतमवर्षस्य पैरालिम्पिकक्रीडायां भागं ग्रहीतुं न शक्नोति।

।। इति वार्ता:।।